1

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

वि·टी·
१

ॐ श्रीसं श्रीगणेशाय नमः। वाच्यत्वं न यावत्समव्यापितयावद्व्याप्यते वृत्त्यादि समव्यापितयेत्यर्थ इत्यप्याहुः प्रमेय
साध्यकेऽभाववत्त्वेनाभावानां भाववत्त्वेन भावानां च वृत्तित्वेन निवेशे अवृत्तिमात्रवृत्तिगगनत्वादिनाविरुद्ध

अथेदं वाच्यत्वं प्रमेयत्वादित्यादौ समव्यापितया वाच्यत्वाभावो वृत्त एव प्रसिद्धः अधिकरणधर्मावच्छि
न्नाभावस्य केवलान्वयित्वात् न चैवं वृत्त एव व्यभिचारः साध्यतावच्छेदकावच्छिन्नसाध्याभावव

पट

घटत्वत्वाभ्यां न च सर्वत्र प्रमेयमात्रस्याभावः सुलभः ननु पारिभाषिकमेवाव्यभिचरितत्वम् तथाहि यत्सम शुभः
नाधिकरणाः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकाः यावन्तो भावाः प्रतियोगिस। १

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

मानाधिकरण्यास्तित्वम् सर्वत्रैव स्वत्वाद्यभावस्य तथात्वात्स्वत्वोपादानम् अत एव भूतत्वमूर्तत्वोभयवान्मूर्तत्वा

द्वितीयस्य व्यभिचारितत्वात् न चात्र स्वत्वाभावत्वाद्दृश्ये एव प्रतिज्ञेति चेत् तर्हि तादृशसाध्याभावसामानाधि
करणाभावो व्याप्तिस्तथा च साध्याभावाप्रसिद्धिः प्रतियोगिवृत्तिश्च धर्मो न प्रतियोगितावच्छेदकः

2 दित्यादौ द्वित्वाद्यवच्छिन्नाभावस्य प्रतियोगिसामानाधिकरण्येऽपि भूतत्वमनोऽन्यत्वाद्यभावस्य तथात्वान्ना

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

चिं· शि·
२

तिप्रसङ्गः साधनसमानाधिकरणस्यगोत्वाद्यभावस्य तत्तत्साध्यव्यक्त्यभावस्य चातथात्वात् साध्यतावच्छेदकेत्यादि ॥

तद्विशिष्टस्यानस्याभावधीहेतुत्वात् अन्यथानिर्विकल्पकानंतरमपि घटो नास्तीति प्रती ॥
ते: गवि शशशृंगं नास्तीति प्रतीतेरप्रसिद्धिः शैशशृंगं नास्तीति च प्रतीतौ शशशृंगाभाव इत्यर्थः

येन संबंधेन हेतुत्वेन संबंधेन तदधिकरणं बोध्यं तेनात्मत्वे साध्ये समवायेन हेतोर्ज्ञानस्य विषयतयाधिकरणो घटादेर्वर्त

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

मानस्य साध्याभावस्य तथात्वेपि न क्षतिः एवं दृष्टान्तेऽपि हेत्वंशभेदनिवेशनो दोषः संबंधैक्यविवक्षायामपि स्म
मीयः रूपादिसामान्याभावे साध्ये पृथिवीत्वादिकं सद्धेतुरेव प्रलयप्रामाण्यानुत्पत्तिकाले चावयवि विनि
ष्टत्वात् न च प्रतियोगिवत्तद्ध्वंसप्रागभाववतोऽप्यत्यन्ताभावविरोधित्वे मानाभावात् अत एवान्त[illegible]ए
श्यामे रक्तं रूपं नास्तीति प्रत्ययः न चैवं रक्तिमध्वंसाद्यवगाही सर्वोऽपि रक्तिमध्वंसप्रागभाववति रक्तेऽपि
तथा प्रत्ययप्रसंगात् तत्सामानाधिकरण्यघटकस्वविशिष्टहेत्वधिकरणावच्छेदेन बोध्यम् तेन गोत्वा
3 जन्यद्रव्यत्वप्रलयावृत्तित्वादिना गवादेरभावस्य गवाद्यनधिकरणधर्म्यवच्छेदेन तद्वृत्तिकालेमहा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada.Peetham

कालेवावृत्तावपि यद्योगोत्वं तद्योगोर्पत्रकालत्वं तत्र जन्यद्रव्यं प्रलयावृत्तिर्वेत्यादौ नातिप्रसंगः हेतुमतिभ
लपेत तत्सामानाधिकरण्याभावात् स्वविशिष्टेति विशेषणात्कपिसंयोगाभाववान् प्रमेयत्वादित्या
दौ संयोगाद्यात्मकस्य साध्याभावस्य सकलहेत्वधिकरणावृत्तित्वेपि नाव्याप्तिः जलत्वादिवृत्तित्वविशि
ष्टो गोत्वाद्यभावस्याभाव।।स्तु जलत्वाद्यभावो न तु धूमाद्यभावः जलत्वादावपि तदभावप्रत्ययप्रसंगात्
पत्समानाधिकरणानां साध्यतावच्छेदकाव।च्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताका
नां पावदभावानां प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं तत्त्वं वा तत् स्तेयत्वादिनाबा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

च्यत्वादीनाभावसुलभ एव शेषं दर्शितदिशावसेयमतस्त्वाह प्रतियोग्यवृत्तिश्चेति केचित्तु व्याप्यवृत्तेर्हेतुसमा
नाधिकरणस्य साध्याभावस्य प्रतियोगितायास्त्वनवच्छेदकं हेतुसमानाधिकरणस्याव्याप्यवृत्तेः ॥ प्रतियो
गिव्यधिकरणस्य वाऽभावस्य प्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकं साध्यतावच्छेदकं तदवच्छि
न्नसामानाधिकरण्यं व्याप्तिः एवं च व्याप्तेरव्यभिचारित्संबंधरूपतापि संगच्छते हेतौ साध्यतावच्छेदकाव
4 च्छिन्नसाध्याभाववदवृत्तित्वस्यैव साध्यतावच्छेदके हेतुमन्निष्ठसाध्याभावप्रतियोगितावच्छेदकसा
पि व्यभिचारित्वात् अनवच्छेदकत्वं चेह तत्पर्याप्त्यधिकरणत्वं तेन विशिष्टवन्त्यभावस्य ह्रदत्ववह्नित्वो

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

मयावच्छिन्नाभावस्य च प्रतियोगितावच्छेदकत्वेपि वन्हित्वस्य न क्षतिः सत्त्ववति च गुणादौ संयोगाद्यभा
वोपि व्याप्यवृत्तिः वक्ष्यमाणं वा प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वमेव तदवच्छेदकत्वमिहापि बोध्य
म् भवति च गुणत्वगुणावृत्तित्वद्रव्यमात्रसमवेतत्वाद्यवच्छिन्नप्रतियोगिताकव्याप्यवृत्त्यभावप्रति
योगितावच्छेदकगुणत्वाद्यनतिरिक्तवृत्त्येव संयोगत्वमित्याहुः साध्यतावच्छेदकावच्छिन्नसाध्यस
मानाधिकरण्यावच्छेदकस्वसमानाधिकरणसाध्याभाववत्त्वकत्वं यत्समानाधिकरणसाध्याभावप्र
मायां साध्यवत्ताज्ञानप्रतिबंधकत्वं नास्ति तत्त्वं वा व्याप्तिरिति तु न युक्तं सर्वत्र साध्याभावपदवैयर्थ्या

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

त् यत्तु साध्याभाववद्वृत्तिपदद्वैतौ प्रकृतानुमितिविरोधित्वंनास्तिनत्वंव्याप्तिरितितन्न अनुमित्यविरोधित्व
ज्ञानस्यानुमितिहेतुत्वेसाध्याभाववद्वृत्तित्वज्ञानस्यानुमित्यविरोधितया व्यभिचारिण्यपि प्रसंगात् के
चित्तु यावन्तः साध्याभावाः प्रत्येकंनतत्तज्जातीयाये तत्तदधिकरणवृत्तित्वाभावास्तद्वत्त्वं तत्त्वम् सा
जात्यंच समानासमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वान्यतररूपेण साध्याभावस्य पूर्वो
क्तद्वितीयपरीत्याप्रत्येतव्यो साध्यवत्तिःस्वप्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यधिकरणेवा तेन
5 तत्तत्साध्यव्यक्तिव्याप्यवृत्तेर्वा साध्यस्याभाववद्वृत्तिहेतोर्वृत्तावपिनाव्याप्तिः तद्वद्वृत्तित्वाभावस्तु तत्तत्सा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ं·शि·
५

ध्याभाववद्वृत्तित्वत्वव्यापकव्याप्तज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकोबोध्यः तेनसाध्याभाववद्वृत्तिर्वि
शेषवृत्तित्वस्यपार्थिवत्वादिविशेषितस्यद्वित्वावच्छिन्नस्यवासाध्याभाववद्वृत्तित्वस्याभावमादायनातिप्रसं
गः अत्रवह्नेर्हेतुतावच्छेदकसंबंधेनसाध्याभाववद्वृत्तित्वंबोध्यम् तेनवन्ह्यभाववतिस्वावयवेधूमस्यवृत्ताव
पिनदोषः इत्थंचसाध्याभावोपिहेतुतावच्छेदकसंबंधेनकस्यचिदधिकरणेवर्त्तमानोग्राह्यः तेनजातिमा
न्सत्वादित्यादौहेतुतावच्छेदकसंबंधेनसाध्याभाववद्वृत्तित्वस्याप्रसिद्धावपिनक्षतिः पञ्चापावंतल्लादृशानां
साध्याभावाः प्रत्येकंतेषांसजातीयस्यव्यापकीभूतस्यव्याप्यवृत्तेरभावस्यप्रतियोगितावच्छेदकेनधर्मे

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

णा पत्रूपावच्छिन्नं प्रतिव्यापकत्वमवच्छिद्यते तद्रूवत्वं तत्वं साधनस्य तादृशाभावप्रतियोगित्वं तदवच्छेद
कत्वं वा साधनतावच्छेदकस्येति तु न वक्तव्यं द्रव्यं सत्वादित्यादौ सत्वादेर्गुणकर्मान्यत्वविशिष्टसत्तात्वा
वच्छिन्नप्रतियोगिताकतादृशाभावप्रतियोगित्वादिति व्याप्तिः ज्ञेयं प्रमेयादित्यादौ प्रमेयत्वादेस्ता
दृशप्रतियोगितानवच्छेदकत्वादव्याप्तेश्च प्रमेयत्वं व्यधिकरणप्रतियोगित्वस्याप्रसिद्धेः पद्वायाव
न्तस्तादृशाः साध्याभावाः प्रत्येकं तत्प्रतियोगितावच्छेदकेन धर्मेण पद्रूपावच्छिन्नं प्रतिव्यापकत्वम
6 वच्छिद्यते तद्रूपवत्वं वा तत्वमित्याहुः परे तु वतिमद्वृत्तपो यावन्तः साध्याभाववद्वृत्तित्वाभावाल्लद्धत्वं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

वै·टी·शि·
६

व्याप्तिः येन संबंधेन हेतुता तेनैव वृत्तित्वमपि बोध्यं तेन अधिकरणधर्मावच्छिन्नवन्ह्यभाववति संयोगेन
यावृत्तिमत्तदभावस्य जात्यादौ वर्तमानस्य धूमादावसत्वेपि न क्षतिः साध्याभावश्च पूर्ववद्बोध्यं तद्वृत्ति
त्वाभावोपि स्वव्यापकतत्तत्साध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकः न तु साध्याभाववद्वृत्ति
त्वत्वातिरिक्तेन समानाधिकरणेन साध्याभाववद्वृत्तित्ववृत्तिना वा धर्मेणानवच्छिन्नप्रतियोगि
ताको बोध्यः॥ तेनालोकाद्यवृत्तित्वेन रूपेण यो वह्निसामान्याभाववद्वृत्तित्वस्य पश्चेन्धनत्वाद्यव
च्छिन्नवन्ह्यभावाधिकरणीभूतमहानसवृत्तित्वादेरभाववत्त्वस्य धूमादौ स्वनिष्ठवृत्तितात्वेन साध्या

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

भाववद्वृत्तित्वविरहस्य च हेत्वंतावत्तेः सत्त्वस्मिन्सत्त्वेपि न स्ततिरित्याहुः अन्ये तु वृत्तिमद्भजयोपात्वं ततः सा
ध्याभावसमुदायाधिकरणवृत्तित्वाभावास्तद्वत्त्वं तत्त्वं तादृशवृत्तित्वाभावश्चस्वव्यापकतादृशवृत्ति
त्वत्वव्यापकप्रतियोगिताको वोध्यः प्रयोजनंचोक्तप्रायम् साध्याभावाधिकरणवृत्तित्वत्वव्यापक
प्रतियोगिताकस्य व्याधिकरणधर्मावच्छिन्नस्यैवाभावस्य वृत्तिमद्वृत्तित्वाद्यभिचारिण्यप्रतिव्याप्तिर्
तः समुदायेति साध्याभावश्चसाध्यतावच्छेदकसंबंधेन वोध्यः तेन समवायेन वन्हेः साध्यत्वे धूमे सं
योगेन च तथात्वेव न्ह्यवयवत्वे पर्वत वन्ह्यवयव संयोगेन च पर्वतस्य वन्ह्यवयवस्य च संबंधद्वयावच्छि

7

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

व्यिं· शि·
७

न्त्ववत्साभाववद्वृत्त्यनधिकरणत्वे नातिव्याप्तिः तथा च व्यापकीभूतसाध्यतावच्छेदकव्यापकप्रतियोगि
ताकोऽपि बोध्यः तेन पृथिवीत्वाभावादौ साध्ये तत्तद्विपत्त्वावतित्वाद्यवच्छिन्नप्रतियोगिताकाभावकू
टाधिकरणमप्रसिद्धम् तत्रसद्धेतौ पृथिवीत्वादौ साध्ये जातित्वाद्यवच्छिन्नाभाववत्तिसामान्यादौ वर्तमा
ने द्रव्यत्वप्रकारकप्रमाविषयत्वादौ चनाव्याप्तिरिति व्याप्तिर्वा नाथमावत्वादिनाऽभावादौ साध्ये तत्साध्या
भावकूटाधिकरणाप्रसिद्ध्याऽव्याप्तिरित्याहुः तन्न द्रव्यत्वपृथिवीत्वोभयवान् द्रव्यत्वादित्यादौ तदुभयान्य
तरत्वावच्छिन्नाभाववति द्रव्यत्वादेरवृत्तेरतिव्याप्तिः अपि च देपृथिव्यन्यद्रव्यत्ववत् द्रव्यत्वादित्यादौ द्रव्य

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

द्रव्यत्वत्वाद्यवच्छिन्नाभावकूटाधिकरणगुणाद्यवृत्तित्वस्य द्रव्यत्वे सत्वादिति व्याप्तेः द्रव्यत्वत्वाद्यवच्छिन्नप्र
तियोगिताकाः पृथिव्यन्यत्वविशिष्टद्रव्यत्वत्वसमव्याप्तत्वात् किंच रूपाभावसाध्यके सद्धेतौ साध्याभाव
समुदायपतिविशिष्टसकलरूपसमानाधिकरणाप्रसिद्धेः यावतामभावानामेकाधिकरणं तावतां समुदा
ये विवक्षिते पीतं पृथिवीवृत्तिगुणशून्यं सत्तान्यपृथिवीसमवेतशून्यं वा वायुत्वाद्रूपवदन्यत्वाद्धेत्वाद्या
वृत्तिव्याप्तिः तत्र तादृशसाध्याभावस्तोमस्य नियमतो रूपादिघटितत्वेन तद्वृत्तिहेतो एव तेः वस्तुतो नि
खिलानामेव रूपाणां तादृशाभावसहस्र समानाधिकरणत्वात् समानाधिकरणयावदभावाधिकर

8

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सिं॰ टी॰ शि॰
८

णाप्रसिद्धेर्दुर्वारत्वेव किंच हेतुतावच्छेदकसंबंधेन पासाध्याभाववति वृत्तिस्तदभावो वक्तव्यः अन्यथा धूमादावव्या
प्तिः साध्यतावच्छेदकसंबंधेन साध्याभाववति कालादौ वृत्तिमत्त्वात्तस्यैव वह्नेः व्यभिचारित्वापत्तिप्रसंगो वा
तथाच सत्तादिसाध्यके संयोगेन समवायेन च हेतुताव व्याप्तिः साध्याभाववतितेन संबंधेन वृत्तेरप्रसिद्धेः सा
धनसमानाधिकरणत्वेन साध्याभावविशेषणीयात् इति चेद्विशेष्यतांतेपापि भूतलमूर्त्तत्वाद्यन्यतरत्वेना
भावे साध्ये स्पर्शवदन्यतादावतिव्याप्तिः तादृशसाध्याभाववत्समुदायवति पृथिव्यादौ तत्स्यावृत्तेः किंच महा
कालान्यत्वादिसाध्यके व्यभिचारिणि कालिकविशेषणताविशेषेण हेतावतिव्याप्तिः तादृशसाध्याभा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

वसमुदायवृत्तिमहाकालेतेनसंबंधेनवृत्तिमन्मात्रस्यैववृत्तेः एतेनसाध्यतावच्छेदकावच्छिन्नव्यापकता
वच्छेदकरूपावच्छिन्नप्रतियोगिताकव्याप्यवृत्तिस्वसमानाधिकरणयावदभावाधिकरणवृत्तित्वाभावापा
वत्तोवृत्तिमद्वृत्तपदत्वंव्याप्तिः केवलान्वयिनः संयोगाद्यभावस्याभावाः संयोगादयोनव्याप्यवृत्तयएवंसाध्य
स्यगुणसामान्यस्याभावोद्रव्यत्वाधिकरणोत्पत्तिकालावच्छेदेनवर्त्तमानोपिनव्याप्यवृत्तिः उक्तरूपावच्छि
न्नप्रतियोगिताकः क्वचिदप्रसिद्ध्यादिसंपादकाः पुनरभावानहेतुसमानाधिकरणाः उक्तसमुदायाः
धिकरणवृत्तित्वतदभाववृत्तिमत्त्वातिपूर्वोक्तरीत्याप्रत्येतव्यानीत्यादिकमपास्तम् तद्विशिष्टे।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

वि·शि·
८

तिविशेषणतावच्छेदकविशिष्टस्तानस्यविशिष्टवैशिष्ट्यप्रत्ययहेतुत्वात् अभावप्रत्ययो हि घटत्वादि
विशिष्टस्य घटादेः प्रतियोगित्वमवगाहमानो विशेषणस्य घटत्वादेस्तदवच्छेदकत्वमवगाहते
न स्वातंत्र्येण घटो नास्तीत्येवं प्रतीतीतिः ॥ तदिहाभावप्रत्ययपदं व्यधिकरणध
र्मेण विशिष्टं प्रतियोगिनं नावगाहते नावगाहत एव न तदा तस्यापि प्रतियोगितावच्छेदक
त्वम् अथऽवावगाहते तर्हि भ्रम एव न न तोर्थसिद्धिरिति भावः यदि पुनरनुभवविकोलो
कानां स्वरसवाही घटत्वेन पटो नास्तीत्यादिप्रत्ययो न तदानाहत्याभाव निवारणां गीर्वाणगु

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नृणामप्यशक्यमितिमन्तव्यम् ॥ इतिश्रीसमाप्तम् ॥ श्रीरामचंद्राय नमः ॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

12

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham